# संस्कृत-वार्ता:

दिनाङ्क : 12/02/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी वित्तमन्त्र्याः निर्मला सीतारामन् वर्यायाः आयव्ययक-भाषणम् आर्थिकपरिवर्तनस्य समग्रं ब्लूप्रिण्ट् इति अस्तीति अकथयत्।
- लोकसभायां औद्योगिक-सम्बन्ध-संहितायाः संशोधनात्मक- विधेयकम् स्वीकृतम्, यस्योद्देश्यमस्ति पूर्वतन-श्रम-विधानानां निरन्तरतायाः विषये भविष्ये कस्याः अपि जटिलतायाः निवारणम्।
- रक्षा अधिग्रहण परिषदा सार्धत्रिलक्षाधिककोटिरूप्यक-मूल्यस्य प्रस्तावाः स्वीकृताः।
- इण्डिया-ए. आई. इम्पैक्ट् इति शिखरसम्मेलनाय प्रधानमन्त्री-मोदी-वर्यस्य आमन्त्रणे ब्राजील्-देशस्य राष्ट्रपतिः लूला डा सिल्वा अस्मिन् मासे भारतम् आगमिष्यति।
- एफ्. आई. एच्. प्रो-लीग्-हाकीति क्रीडायां भारतीय-पुरुष-दलम् अद्य राउर्केला-नगरे अर्जेण्टीना-देशेन सह क्रीडति।

-------------------------------------

<u>प्रधानमंत्री - सीतारामन आय-व्ययक भाषणम्</u>

प्रधानमंत्रिणा नरेंद्र मोदिना उक्तं यत् वित्तमंत्री निर्मला सीतारामन वर्या लोकसभायां स्वीयाभिभाषणे विषयेस्मिन् व्यापक-विवरणं प्रदत्तवती यत् अस्य वर्षस्य आय-व्ययकेन देशस्य आर्थिक क्षेत्रेषु कीदृशानि परिवर्तनानि आगमिष्यन्ति। लोकसभायां आय-व्ययके वित्तमंत्रिणः प्रदत्तस्य उत्तरस्य वीडियो इति चलचित्रं सामाजिकान्तर्जालीय-पटले विनिमयी कुर्वन् श्रीमोदिना उक्तं यत् तया रिफॉर्म एक्सप्रेस इत्यस्मिन्, सूक्ष्म-लघु-मध्यम-उद्यमं, एम.एस.एम.ई. इति समर्थनं, कौशल विकासं, भारतस्य भावि भविष्यस्य आधारभूत संरचनां च संवर्धनाय शिक्षादि विषयेषु बलं प्रदत्तम् इति।

-------------------------------------

## रा.स.-केन्द्रीय-आयव्यय-संकल्पनेति विषये परिचर्चा

अद्य राज्यसभायां सत्रस्यास्य केन्द्रीय-आयव्यय-संकल्पनेति विषये परिचर्चा पुनः समारब्धा। चर्चायां भागम् गृह्णन् भाजपेति दलस्य नेता मदन राठोरः अवदत् यत् भारतस्य अर्थव्यवस्था विश्वस्य चतुर्थी बृहत्तमा अर्थव्यवस्था अभवदिति। सः अवदत् यत् मोबाईल इति जङ्गमदूरवाण्याः विनिर्माणक्षेत्रे भारतं अधुना विश्वस्य द्वितीयः बृहत्तमः उत्पादकः सञ्जातमस्ति। भाजपेति दलस्य शंभुशरण पटेलः केन्द्रीय-आयव्यय-पत्रं प्रशंसयन् उक्तवान् यत् एतत् देशवासिनां अपेक्षां पूरयिष्यतीति। पूर्वं, केन्द्रीयमन्त्री डा. एल्. मुरुगनः सार्वजनिक-लेखोपक्रम-समित्यां सप्तसदस्यानां निर्वाचनस्य प्रस्तावं प्रेषितवान्, यद्धि ध्वनिमतेन स्वीकृतम्। एस. सी.एस. टी. इति कल्याणसमितेः दश-सदस्यानां निर्वाचनस्य प्रस्तावः अपि सभया स्वीकृतः। अनेनैव सह लोकसभायां औद्योगिक-सम्बन्ध-संहितायाः संशोधनात्मक- विधेयकमपि स्वीकृतम्, यस्योद्देश्यमस्ति पूर्वतन-श्रम-विधानानां निरन्तरतायाः विषये भविष्ये कस्याः अपि जटिलतायाः निवारणम् इति।

--------------------------------------

## रक्षा-अधिग्रहण-परिषद्- डीएसी राफेलः

रक्षा-अधिग्रहण-परिषदा सशस्त्र-बलानां क्षमता-भिवर्धनाय सार्धत्रिलक्षाधिककोटिरूप्यक-मूल्यस्य प्रस्तावाः स्वीकृताः। रक्षामन्त्रालयेन सूचितं यत् भारतीय-वायुदलेन बहु-भूमिका-युक्त-युद्धविमानानां (MRFA) रफ़ेल्-विमानानां, युद्ध-क्षिपणिनां, वायु-नौकायान-आधारित-उच्च-ऊर्ध्वता-स्यूडो-उपग्रहस्य (AS-HAPS) क्रयणाय च आवश्यकतां स्वीकर्तुं (AoN) अनुमतिः दत्तः इति।

--------------------------------------

## एल. एस.-जोशी-राहुलः

केन्द्रीयमन्त्री प्रल्हादजोशी अद्य आरोपितवान् यत् लोकसभायां विपक्षस्य नेता राहुलगान्धी, सदने तथ्यसाक्ष्ययोरभावेऽपि वक्तव्यं करोतीति। संसद-परिसरे वार्ताकारैः सह

वार्तालापं कुर्वन् मन्त्री अवदत् यत् राहुलगान्धिनं विरुध्य विशेषाधिकार-प्रस्ताव-विषये निर्णयः संसदीयकार्यमन्त्रालयाधीनः अस्तीति। सः अवदत् यत्, श्रीगान्धी, लोक-सभायां, सभायाः बहिः वा अपरिपक्वरूपेण व्यवहरते। ह्यः संसदीयकार्यमन्त्री किरेन रिजीजूः अवदत् यत् आयव्ययिक-चर्चायाः समये लोकसभां भ्रामयितुं, आधाररहित- वक्तव्यकृतवतां विपक्षनेतॄणां विरुद्धं भाजपेति दलं विशेषाधिकार-प्रस्तावं आनयतीति।

---------------------------------------

<u>आरएस-जे केः</u>

श्रम-वृत्यवसर-राज्यमन्त्री शोभा करन्दलजेः अवदत् यत् विगतद्विवर्षयोः जम्मू-कश्मीरस्य कर्मचारी भविष्यनिधि-सङ्घटनायां (ई पी एफ् ओ) 1.6 लक्षतः अधिकाः नूतन-अभिदाताः योजिताः सन्ति। जम्मू-कश्मीरस्य निरुद्योगस्य विषये राज्यसभायां प्रश्नोत्तरकाले उत्तरं ददन्ती मन्त्री अवदत् यत् देशे एम्. एस्. एम्. ई. इति क्षेत्रस्य औपचारिकतायै सर्वकारः कार्यं कुर्वन् अस्तीति।

---------------------------------------

<u>प्रधानमन्त्री सेवा तीर्थः</u>

प्रधानमन्त्री नरेन्द्रमोदी श्वः राष्ट्रिय-राजधान्यां सेवा-तीर्थेति भवन-सङ्कुलस्य अनावरणं करिष्यति। ततः परं प्रधानमन्त्री औपचारिकरूपेण सेवा-तीर्थस्य अथ कर्तव्य-भवन-प्रथमद्वितीययोः उद्घाटनमपि करिष्यति, सायङ्काले च सेवा-तीर्थे सार्वजनिककार्यक्रमम् अपि सम्बोधयिष्यति।

---------------------------------------

<u>ऊर्जा-राज्यमन्त्री श्रीपाद-येसो-नाइकः</u>

ऊर्जा-राज्यमन्त्री श्रीपाद-येसो-नाइकः अवदत् यत् भारतं विद्युत्-अभाव-देशात् विद्युत्-अधिशेष-देशत्वेन अभवत्। लोकसभायां अद्य अनुपूरकप्रश्नान◌ाम् उत्तरं ददता श्रीनाईकेन उक्तं यत्

प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे चतुर्दशधिक द्विसहस्रतम वर्षादारभ्य विद्युत्क्षेत्रे अनेकानि परिष्काराणि कृतानि सन्ति।

---------------------------------------

टेक्सटाईल-भारत-अमेरिका व्यापारः

वस्त्रोद्योगः भारत-अमेरिका-देशयोर्मध्ये सञ्जातायाः अन्तरीम-व्यापार-सन्धेः प्रशंसाम् अकरोत्। आलोक्-इण्डस्ट्रीज्-लिमिटेड् इत्यस्य निर्देशकः, रिलायन्स्-इण्डस्ट्रीस्-लिमिटेड् इत्यस्य अध्यक्षः अनिल-राजवंशी इत्येषश्च अवदताम् यत् अनया सन्ध्या भारत-अमेरिका-देशयोर्मध्ये व्यापारः वर्धयिष्यतीति। ताभ्यामुक्तं यत् अनेन व्यवहारेण वस्त्रक्षेत्रस्य सार्धचतुः कोट्यधिकाः जनाः उपकृताः भविष्यन्तीति।

---------------------------------------

बाङ्गलादेशः-निर्वाचनम्

बाङ्गलादेशस्य त्रयोदश-राष्ट्रियसंसदीयनिर्वाचनाय जनमतसङ्ग्रहाय च मतदानं कठोरसुरक्षायां प्रचलति। मतदानं प्रातः सार्धसप्त वादनतः आरभ्य सायं सार्धचतुर्वादन-पर्यन्तं भविष्यति। एकोनत्रिशत- निर्वाचनक्षेत्रेभ्य निर्वाचनं सप्तशताधिक-द्विचत्वारिंशत्मतदान केन्द्रेषु भविष्यति। नूतनस्य सर्वकारस्य निर्वाचनेन सह, मतदातारः "जुलै-चार्टर्" इत्यस्यान्तर्गतं प्रस्तावितानां संवैधानिकानां संस्थागतानाञ्च परिष्काराणां विषये निर्णयं कुर्वन्ति। यद्यपि विमर्शकानां मतेन बहुविध-परिष्कारेभ्यः एकेन आम् न वेति प्रश्नोत्तर-रूपेण संयोजयित्वा मतदातृ-चयनं परिमितम् भवतीति। सप्तसप्ततिलक्षोत्तर-द्वादश कोट्यधिकाः मतदातारः मतदानार्थं पात्रत्वमधिगताः सन्ति। निर्वाचनमिदं ध्यात्वा बाङ्गालादेशस्य सीमावर्तिषु समीपस्थेषु मण्डलेषु च कठोरसुरक्षाव्यवस्था कृता अस्ति। सीमा-सुरक्षा-बलस्य, आरक्षका: कर्मचारिणश्च नैरन्तर्येण निरीक्षणरताः सन्ति।

---------------------------------------

यूरोपीयसङ्घस्य सभा:

सप्तदशसदस्यीय-यूरोपीय-सङ्घस्य नेतारः अद्य बेल्जियम्-देशस्य षोडश शताब्द्याः आल्डेन् बैसेन्-दुर्गे समूहस्य भावि-कार्यनीतेः विषये चर्चां कर्तुं वर्धमान-वैश्विक-समस्यानां मध्ये समागच्छन्ति।

---------------------------------------

<u>ब्रज़िल्-देशस्य राष्ट्रपतिः लूईज- इंडिया-ए. आई. इंपैक्ट</u>

ब्रज़िल्-देशस्य राष्ट्रपतिः लूईज इनासियो लुला डा सिल्वा नवदिल्ल्यां आगामि इंडिया-ए. आई. इंपैक्ट- इति शिखरसम्मेलनाय प्रधानमन्त्रिणः नरेन्द्रमोदिन: आमन्त्रणे अस्मिन् मासे अष्टादश दिनाङ्कादारभ्य फरवरीमासस्य द्वाविंशतिः दिनाङ्कपर्यन्तं भारतस्य राजकीययात्रायां भविष्यति। अद्य राष्ट्रिय-राजधान्यां प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् श्री लूला डा सिल्वा वर्येण सह नैके मन्त्रिणः वाणिज्यप्रतिनिधयः च भविष्यन्ति। फरवरी मासस्य एकविंशति दिनाङ्के द्वैपाक्षिकं वार्तालापं भविष्यति, तस्य आतिथ्यं राष्ट्रपति पदासीनया द्रौपदी मुर्मू वर्यया क्रियते इति सः अवदत्। सः अवदत् यत् फ्रान्स-देशस्य राष्ट्रपतिः इम्मैनुयल मैक्रो अपि शिखरसम्मेलनाय त्रिदिवसीया आधिकारिकयात्रायां भविष्यति इति।

---------------------------------------

<u>हॉकी प्रो लीग</u> :

एफ्.आई. एच्. प्रो-लीग् पुरुष-हाकीति क्रीडायां हर्मन्प्रीत् सिङ्घ् इत्यस्य नेतृत्वे भारतीयदलम् अद्य ओडिशा-राज्यस्य राउर्केला-नगरस्य बिर्सा मुण्डा-हाकी-क्रीडाङ्गणे अर्जेण्टीना-देशेन सह क्रीडति। आतिथ्येन देशेन चतुर्दशदिनाङ्के पुनः बेल्जियम्-देशस्य साम्मुख्यं करिष्यते।

।। इति वार्ता: ।।